जय भारति

वैजयन्ती

माप्ताहिकी संस्कृत पत्रिका । श्री गुरुराजाङ्कः प्रतिभौमवासरं प्रकाश्यते ।

प्रथमो वर्षः । विजयवत्सरे श्रावणी कृष्ण नवमी तुरीया मञ्चिका ।

संचालकाः गलगली रामाचार्याः] मङ्गलवारः [संपादकः पण्ढरीनाथाचार्यः

श्रीगुरुसार्वभौमाणाम् आराधनामहोत्सवः

पूज्याय राघवेन्द्राय सत्यधर्मरताय च । भजतां कल्पवृक्षाय नमतां कामधेनवे

एष श्री राघवेन्द्रव्रतिवरचरिताम्भोनिधिः क्वातिवेलः ।
क्वासौ खद्योतपोतप्रमुषितविभवश्चेतसो नः प्रकाशः ॥
वन्ध्यैवातः प्रतिज्ञा तदतुलनिखिलाश्चर्यचर्याभिधाने ।
स्थानेऽथापि क्वचित् स्यादिहपुनरुदधिस्नानसङ्कल्पवत्सा ॥

त्वङ्गत्तुङ्ग तरङ्गायाः कृतदुरितभङ्गायाः तुङ्गायाः तीरे मन्त्रालय नामकं सुप्रसिद्धं क्षेत्रं वरीवर्ति । तत्र भगवद्भक्तस्य श्री प्रल्हादस्य अवतारत्वेन सुप्रसिद्धानां ब्रह्मज्ञानिनां श्री राघवेन्द्रतीर्थस्वामिपादानां महासमाराधनमहोत्सवः प्रतिवर्षं श्रा. व. १. २. ३ दिनेषु महता उत्साहेन निर्वर्त्यते । परःसहस्रा एव भक्तजनाः दूरदूरदेशेभ्यः गुरुसार्वभौमाणां सन्दर्शनाय आगच्छन्ति । कलियुगे श्री राघवेन्द्र स्वामिनां वृन्दावनस्य यादृशी यावती वा सेवा शिररूपादिकं प्रचलति यावन्तो वा तद्भक्ताः उपलभ्यन्ते यावन्ति वा महिमानि श्रूयन्ते दृश्यन्ते च तावत्प्रमाणेन नान्यस्य कस्यापि देवस्य देवभक्तस्य वा सत्पुरुषस्य वा पूजापर्युपासनादिकं कुत्रापि प्रवर्तते । अत्र महाश्चर्यं नाम महामहानास्तिकाः पाखण्डिनः अपि श्रीगुरुसार्वभौमाणां महिमानम् अनूभूय तद्दासानुदासा एव सम्भवन्ति।

"उपाधिस्तत्रायं स्फुरति यदभीष्टं वितरति"

श्री राघवेन्द्रस्वामिनां वृन्दावनस्य प्रदक्षिणानमस्कारादिकर्तृषु प्राचीनवेषधारिणां चिक्कणशीर्षकाणां वैदिकब्राह्मणानाम् अपेक्षया वक्रीकृतसीमन्तरेखानां नवयुगवेषभूषादिभासुराणां बी. एस्. सी. एम् एस्. सी. पी. एच्. डी इत्यादि पदवीधराणां निरीश्वरवादिनां नास्तिक नास्तिकानां पाखण्डपरिषदाखण्डलानां सुधारकाग्रणीनामेव सङ्ख्या अधिका दृश्यते । यः खलुः "न सन्ध्यां सन्धत्ते, हरिमपि न चित्ते कलयति। न वा मौञ्जीबन्धं, व्रतनियमनिर्बन्धमपि च ॥ पुराणं निन्दन् "वैबलमपि कुराणं च पठति। न काशी रामेशः शिवशिव न हिन्दुर्न च द्विजः" सोऽपि श्रुतिद्रोही स्मृतिद्वेषी पुराणप्रतिवादी धर्मदूषकः सनातनसंप्रदायशत्रुः अपि

Scanned by CamScanner

नास्तिकः मन्त्रालयम् आगत्य आस्तिको भूत्वा श्रीगुरुराजानां वृन्दावनस्य पुरस्तात् स्थित्वा बद्धाञ्जलि पुटः बाष्पगद्गदकण्ठेन इति श्रद्धया परिपठति

श्री राघवेन्द्र गुरवे नमोऽत्यन्त दयालवे

"स्तोत्रेणानेन यः कुर्यात् प्रदक्षिणनमस्कृति । स जङ्घालो भवेदेव गुरुराजप्रसादतः । "सन्तान संपत्परिशुद्ध भक्तिविज्ञानवाग्देहसुपाटवादीन् । दत्वा शरीरोत्थ समस्त-दोषान् हत्वा सः" सर्वान् परिपालयेदेव । नूनं श्री राघवेन्द्रस्वामिनो नाम कलियुगे 'भजतां कल्पवृक्षाः नमतां कामधेनवः" एव । यः कोऽपि वा नरः यां कामपि सतीं कामनाम् आशां वा मनसि गृहीत्वा श्रीगुरुसार्वभौमस्य सेवा शिश्रूषादिकं करोति तां तां सः गुरुराजप्रसादतः लब्ध्वैव संपन्नमनोरथ एव निवर्तते । अद्यापि भक्त्या श्री गुरुराजवृन्दावनं सेवमानः न कोऽपि मानवः अकृतार्थः अपरिपूर्णमनोरथोवा प्रतिनिवृत्त इति दृष्टम् अस्माभिः । "विद्यार्थी लभते विद्याम्, सुखार्थी लभते सुखम् । पुत्रार्थी लभते पुत्रम्, धनार्थी लभते धनम् । वृत्त्यर्थी लभते वृत्तिं, जयार्थी लभते जयम् । यं यं कामयते चार्थं प्राप्नोत्येव न संशयः ॥ एवं प्रथमतः क्षुद्रकामान् प्रदाय श्रद्धाम् उत्पाद्य ततः स्वग्रन्थ मुखेन दिव्यज्ञान भक्ति-वैराग्यादीनपि प्रदाय " अपि प्रायश्चित्तप्रसरणपथातीतचारितानपि" नरान् कृपया तपोमहिम्ना सदनुग्रहभूम्ना च समुद्धरन् अयंनः गुरु-सार्वभौमः "अगम्य महिमा" एव राघवेन्द्रः ।

अहो महामहिमा महनीय चरितानाम् महात्मनाम् एतेषां यतिकुलशिखामण्डनमणीनाम् यदेतेषां

" वृन्दावनम् आसाद्य पङ्गुः खञ्जोऽपि वा जनः।
" पूज्याय राघवेन्द्राय सत्यधर्मरताय च ॥
भजतां कल्पवृक्षाय नमतां कामधेनवे " इति

धूतावद्यैरविद्याविघटनपटुभिर्विद्वदभ्यर्थनीयैः
वाचः प्राचां प्रवाचामुपचयमभजन् यत्कृत
ग्रन्थजातैः ॥
संख्यावन्तो यमाहुर्मुहुरखिलकलामूर्तिमुद्वेल.
कीर्तिः
धीर श्रीराघवेन्द्रः स दिशतु सततं भव्य
मव्याहतं नः ॥

Scanned by CamScanner

: जय भारति :

वैजयन्ती

श्रावण व. २ मङ्गळवारः शके १८७९

न जाने स्वाराज्यं किममृतमयं किं विषमयम् ?
क्वचिदपि च हा हेति रुदितम्

१९४७ अगस्ट चतुर्दशी रात्रिः वस्तुतः भारतस्य कालरात्रिः एव। अनादिकालतः एकम् अखण्डं च भारतम् तस्यां तमस्विन्यां छिन्नभिन्नं अभवत्। भारतमातुः हृदयमेव खण्डितम्। अङ्गभङ्ग एव च समजनि। अद्यापि नेतृनिष्ठाः भारतीयाः स्वनायकस्य श्री जवाहारस्य वचनमेव प्रमाणीकृत्य स्वातन्त्र्योत्सवं सोल्हाहं निर्वर्तयितुं प्रवृत्ताः। सहस्राधिकवर्षानन्तरं लब्धात् स्वाधिकारात् प्रमत्ताः प्रमुदितचित्ताश्च भूत्वा आनन्दोद्रेकेण उत्साहातिरेकेण उल्हासोल्लासेन उन्मादावेशेन च सिंहनादं घनगर्जनं मयूरनर्तनं भृङ्गसङ्गीतं कपिकोलाहलं च अकुर्वन्।

एवं यदा क्वचिद्–अत्र भारते वीणावाद्यम् आसीत् तदा तत्र पाकिस्ताने स्थितानां हिन्दूनां शंखवाद्यं रणवाद्यं मरणवाद्यं हा हेति रुदितम् च उदितमासीत्। पुत्रा इव वृत्रस्य प्रतिबिम्बा इव हिडिम्बस्य अंशा इव कंसस्य डिंभा इव कुम्भकर्णस्य अवतारा इव तारकासुरस्य भृत्या इव मृत्योः मूर्तय इव आर्तीगांमेका इव निर्विवेकः मीना इव पीनाः यवनाः हिन्दूजातेरेव 'होली' कर्तुं प्रवृत्ताः। तास्मिश्च स्वयन् अधिकारिभिरेव बुद्धिपूर्वकं कृते 'हिन्दुमेधे' कोटिश एव घातिताः पातिताः पीडिताः ताडिताः हिंसिताश्च हन्त निरुपद्रवाः हिन्दूबन्धवः। लक्षाधिका एव च आर्यमहिलाः 'स्वराज्यमदिरामत्तैः तुरुष्कैः नष्टा भ्रष्टा श्च खण्डिताः। जात्यैव क्रूराः करालाश्च यवनाः। काफरा इति हिन्दून् प्रति जातिद्वेषः। अत्रान्तरे स्वातन्त्र्यं। तदुपरि च नेतॄणां हिन्दूहितार्थं चोदना चलित मुगमना भूतादिशा वृश्चिकदष्टा मर्कटा इव तुर्का अपि निरंकुशाः निःशङ्कं निस्सङ्कोचं निरातङ्कं हिन्दूवधसत्रं प्रारभन्त। कन्यादर्शं बलात्कारम् अकुर्वन्। हिन्दूवदम् उदंपेषं चूर्णपेषं पिष्टपेषं च अपिनषन्। करग्राहं केशग्राहं जीवग्राहं च गृहीत्वा दण्डोपघातं पादाघातं कमुष्टयातं च अघ्नन् पशुमारम् अमारयन्। बहूनामेव च हिन्दूनां शरीरयष्टीः इक्षुभङ्गं बभञ्जुः, उरोविदारं च सुन्दरीः छुरिकाभिः अच्छिन्दन्। एवं यदाऽत्र हिन्दूनां भारते स्वाराज्यं प्राप्तमासीत् तदा तत्रापि हिन्दूनां बन्धूनां स्वाराज्यम्-स्वर्गराज्यमेव प्राप्तमासीत्। यद्यपि व्यतीताः खलु षड्वर्षाः संवृत्ताया अस्याः घटनायाः। बहव एव हि तदा प्रवृत्ताः विषयाः विस्मृतिपथंगता एव। परंतु तदा स्वाराज्यसूर्योदये यवनयुवकैः तत्र समाचरितं शार्दूलविक्रीडितं मत्तेभविक्रीडितं भुजङ्गप्रयातम् उन्मत्ताश्वधाटी वा न कदाचिदपि विस्मर्तुं शक्यते। सः हिंसाकाण्डः नित्यनूतन इव पदे पदे स्मृतिपथमवतरति। अद्यापि अत्र आधाव्य आगताः तस्मिंश्च युद्धकाण्डे हतशेषाः अर्धदग्धाः ऊनाः अङ्गहीनाः दीनाः दूनाः ज्ञातिबान्धवशून्याः अनाथाः अगतिकाः अशरणाश्च कोटिशो निर्वासिताः निष्कासिताश्च निराश्रितजनाः विमुग्मूर्पितमपि तं दारुणं प्रळयप्रसङ्गं क्षणे क्षणे स्मारयन्ति। पुनः पुनश्च प्रक्षोभयंति उद्वेजयंति चा तेषां करुणाकथा रुधिरप्रदिग्धेद्दशस्वराज्यापेक्षयापि "श्रेयो भोक्तुं भैक्ष्यमपीहलोके" इति निर्वेदमेव उपजनयति। एतत्सर्वस्मरणे स्वातन्त्र्यं कोट्यधिकबन्धूनां बलिं दत्वा संपादितमिदं स्वराज्यं भारताय दैवदत्तः कश्चन शाप एव न वरः इति भावना उदेति।

लोकमान्य टिळक स्मरणम्

स्मारयिता-लोकनायक अगे, भूतपूर्वीबहारराज्यराज्यपालः
आलेक्य श्रुतिशास्त्रवाग्जलनिधिं यः प्रोज्जहारामृतम्
गीताभाष्यपुटे निधाय जनतोद्धाराय तत्पुण्यधीः।
सोपानं सुलभं ददौ स्थितधियां स्वर्गामृतप्राप्तये।
बालं भारतभव्यभालतिलकं तं श्रद्धया मन्महे॥

* श्री गुरुराजानां राघवेन्द्रस्वामिनां संक्षिप्तं जीवनचरितम् *

पुरा किल तुण्डीरमण्डले तिम्मणभट्ट नामा एक पण्डितः बभूव। तस्य वेदेषु, शास्त्रेषु तथा वीणावादनेऽपि असाधारणं पाण्डित्यम् आसीत्। तस्य गोपम्मा नाम भार्याऽऽसीत्। तस्यां तेन श्रीवेंकटेशस्य अनुग्रहेण पुत्रः उत्पन्नः। सः तस्य वेंकटभट्ट इति नाम चकार। सः चतुरमतिः वेंकणभट्टः चतुःशास्त्रेषु, चतुर्वेदेषु, चतुःषष्ठिकलासु च प्रवीणः अभवत्। तस्य असाधारणं पाण्डित्यं प्रतिभाप्रकर्षं वादवैदुष्यं च दृष्ट्वा परम सन्तुष्टाः श्रीमठसंस्थानाधीश्वराः श्री सुधीन्द्रतीर्थ स्वामिपादाः सन्यासाश्रमं प्रदाय श्री राघवेन्द्रतीर्थ-इति नामकरणं विधाय श्री मठस्य उत्तराधिकारिणम् अकुर्वन् श्री वेंकणभट्टम्। इमां वार्तां श्रुत्वा वेंकणभट्टस्य पूर्वाश्रम प्रणयिनी परमपातिव्रता श्री सरस्वतीनाम्नी पत्नी पतिप्राणतया पतिवियोगदुःखं सोढुमशक्नुवाना कूपे उत्प्लुत्य जले निमज्य मृताऽभवत्। पत्युः परमानुग्रहेण पातिव्रत्यप्रभावेण च दुर्मरणेऽपि सद्गतिं दिव्यलोकांश्च प्राप्नोत् सतीशिरोमणिः सरस्वती।

ततः श्री राघवेन्द्रतीर्थाः सत्सिद्धान्त प्रसाराय वादिनिग्रहार्थं च दिग्विजयार्थं प्रस्थिताः। अप्रतिमेन पाण्डित्येन वाक्चातुर्येण च सर्वेऽपि प्रतिपक्षिणः पराजिता एव। अखण्डे भरतखण्डे सर्वत्रापि संचार्य समीरसनयसिद्धान्तान् साधु प्रत्यपीपदन् प्राचारयन् प्रासारयंश्च। मन्दोपकारार्थं भाविजनाङ्गोपयोगार्थं च असर्वज्ञदुर्ज्ञेयानां श्रीमदाचार्यग्रन्थाणां टीकाटिप्पणीः व्यलिखन्। कांश्चन स्वतन्त्रग्रन्थानपि व्यरीरचन्। सायणाचार्यैरिव श्री राघवेन्द्रतीर्थस्वामिपादैरपि समग्रवेदस्यैव सायणभाष्यापेक्षयाऽपि अत्युत्तमं महाभाष्यमेकं विरचितमासीत्। सः बृहद्ग्रन्थः बहुभिरेव वार्धिष्ठपण्डितैः हैदराबादस्य कस्यचित् यवनस्य गृहे दृष्टः अपि। सः ग्रन्थः जर्मन्देशीयया कयाचन संस्थया तस्मै लक्षाधिकान् रूप्यकान् दत्वा क्रीतः गृहीतः स्वदेशं प्रति च नीतः। सः अद्यापि जर्मन् देशे कस्मिंचन ग्रंथालये वर्तते इत्यपि शृणुमः। सः ग्रंथः यदि तद्भक्तैः तत्पीठमधितिष्ठद्भिः श्रीस्वामिपादैर्वा आशु तस्य एका प्रतिर्वा यद्यानाय्येत तदा न केवलम् आचार्यमतानुगामिन एव किन्तु सर्वोऽपि वैदिकसमाजः किंबहुना सर्वभारतीया एव उपकृता भवेयुः इति सूचयामः श्रीगुरुराजा अपि तेन निरतिशयमेव सन्तुष्येयुः अनुगृह्णीयुश्चेत्यत्र नास्त्येव बिन्दुमात्रोऽपि सन्देहः। तदेव हि श्रीगुरुसार्वभौमाणाम् उचितं सदृशं प्रीतिजनकं च आराधनमिति मन्यामहे वयम्।

श्री स्वामिपादैः अन्येऽपि भूयांस एव अमूल्याः ग्रन्थाः विरचिताः। तत्र अद्य उपलभ्यमानग्रन्थाः नाम (१) वेदत्रयविवृतिः (२) मन्त्रार्थमञ्जरी (३) पुरुषसूक्तादिपञ्चसूक्तव्याख्या (४) दशोपनिषत् खण्डार्थ (५) गीतार्थसंग्रहः (६) प्रमेयदीपिकाव्याख्या (७) गीतातात्पर्यटीकाविवरणम् (८) तन्त्रदीपिका (९) न्यायमुक्तावली (१०) तत्वमञ्जरी (११) तत्वप्रकाशिकाभावदीपः (१२) परिमळम् (१३) दशप्रकरणटीकाव्याख्या (१४) रामचारित्रमञ्जरी (१५) कृष्णचारित्र्य मञ्जरी (१६) निर्णयभावसंग्रहः (१७) वादावलीव्याख्या (१८) चन्द्रिका प्रकाशः (१९) तर्कताण्डवव्याख्या (२०) प्रमाणपद्धति व्याख्या (२१) अणुमध्वविजयव्याख्या (२२) प्रातःसङ्कल्पगद्यम् (२३) भाट्टसंग्रहश्चेत्येतावन्त एव। एतावन्मात्रेणापि गुरुसार्वभौमाणां प्रतिभागौरवं महापाण्डित्यं च स्पष्टं प्रतीयते। एवं कर्णाटकभाषायामपि काश्चन कृतयः श्रीपरमगुरूणां सर्वजनादरणीयतां भजन्ते। गानकलायामपि तेषां कौशलमासीदिति शृणुमः। एवं महामहिमोपेताः श्रीस्वामिपादाः विरोधि संवत्सर श्रा. ब. २. दिने बृन्दावनं प्रविविशुः। बृन्दावनस्था अपि गुरुसार्वभौमाः भक्तानां कामितार्थान् कामधेनु कल्पवृक्षकल्पाः पूरयन्त एव विराजन्ते। अत एव तत्र प्रतिवर्षं दशसहस्राधिका एव जना आराधनामहोत्सवार्थं धावन्ति।

अस्मिन्नेव च आराधनावसरे विद्वत्सभां कृत्वा विदुषः विद्यार्थिनश्च भूरिदाक्षिणाभिः अनुगृण्हतः श्रीमन्त्रालयपीठाधीश्वरान् कर्मन्दिवृन्दारकवृन्दपुरन्दरान् जगद्गुरु श्री सुयमीन्द्रतीर्थस्वामिपादानपि सानन्दमभिनन्दामः सश्रद्धम् अभिवन्दामहे च॥

Scanned by CamScanner

विमर्शवेदिका

“ सिरिभूवलयम् ”

अद्भुतं एकं सर्वभाषामयं प्राचीनकाव्यं

एतस्य च जगत्तिलकस्य काव्यस्य प्रणेता कविः श्रीकुमुदेन्दुमुनिः ईसवीय ७८३वर्षे आसीदिति ज्ञायते। इदं च कर्णाटकभाषामयं काव्यम्। कन्नडसाहित्ये उपलभ्यमानेषु ग्रन्थेषु एतदेव अत्यन्तपुराणतमं श्रेष्ठतमं चेति प्रतीयते। राष्ट्रकूटवंश्याः अमोघवर्ष-गङ्गराज-शिवकुमार प्रभृतयः अस्य शिष्याः आसन्। शिष्याणां कालस्य निश्चितत्वेन तद्गुरोः श्री कुमुदेन्दुमुनेः अपि कालः स्फुटम् अवसीयते। अयं च महाकविः बेंगळूर प्रान्तगतस्य नन्दीबेट् पर्वतस्य अधस्तात् एलव नाम्नः ग्रामस्य ग्रामीणः आसीत्।

“ ग्रन्थस्य विराड्रूपम् ”

इदानीं च प्रकाशितोऽयं ग्रन्थस्य प्रथमो भागः अष्टसहस्रैः चक्रैरुपेतो वर्तते। अस्मिन् काव्ये नव-खण्डाः वर्तन्ते। “ मङ्गलप्राभृत ” नाम्नः प्रथम खण्डस्य एकतृतीयांशभागमात्रं सज्जीकृत्य एतत्पुस्तकरूपेण प्रकाशितवन्तः श्रीकर्लमङ्गलं श्रीकण्ठय्यामहोदयाः। अस्य च महतो महीयसः ग्रन्थरत्नस्य इयन्तमेव अल्पीयांसं भागं संशोधयितुं प्रकाशनयोग्यं च कर्तुं त्रिंशद्-वर्षान् यावत् अविरतं परिश्रान्तं श्रीसंपादकैः। संपूर्णोऽयं ग्रन्थः कदा वा कथं वा प्रकाशपदवीम् उपेयादिति नैव जानीमो वयम्।

“ ग्रन्थस्य लोकोत्तरं वैशिष्ट्यम् ”

अयं हि सर्वभाषामयोऽत्यपूर्व एव एकः ग्रन्थः। ७१८ भाषाः अत्र उपनिबद्धाः। सर्वा अपि भाषाः कन्नडभाषां मध्ये कृत्वा परितः परिसरन्ति। कन्नड पद्यस्य प्रथमाक्षराणि च उपरिष्टाद् अधोऽधः यदि अनुप्राक्ष्यन्ते तदा वा अन्यैव भाषा भवति अन्य एव च ग्रन्थोऽपि भवति। एवमेव द्वितीय तृतीय नवम–पादादि-पद्यस्थिताक्षराणि च उपरिष्टाद् अधः पठ्येरन् तदा तदपि एकं अपरम् एव काव्यं भवति। अधस्ता-च्च उपरि चेत् यदि पठ्येत तदपि अन्यदेव किमपि कमनीयं काव्यं भवति। एवमेव दक्षिणतो वामं, वामतो दक्षिणं, अधरोत्तरं, उत्तराधरं वा अवलोकयेत, अथवा यदि मध्ये अश्वप्लुत्या वा व्युत्क्रमेण वा कतिपयाक्षराणि नियतक्रमेण परित्यज्य वा पठितेऽपि नवनवा एव भाषाः नवनवीनानि एव काव्यानि अन्यादृशा एव ग्रन्थाः दृग्गोचरीभवन्ति। अस्मिंश्च ग्रन्थमहाकासारे कियत्यपि प्रयत्ने संशोधने च विहितेऽपि अत्यन्तं अपरिपूर्णमेव, अपर्याप्तमेव च इति ब्रूमो वयम्।

आत्मविदिताः काश्चन एव परिमिताः भाषाः अत्रत्यश्लोकेषु परिचिताः अङ्किताश्च श्रीमद्भिः संपादकैः अस्य ग्रन्थस्य। तासु काश्चिदत्र उदाह्रियन्ते।

प्राकृतभाषाः— “ अट्ठविह कम्मवियला नि-ट्ठियकज्जा सणट्ठ संसारदिट्ठसयलत्थसारा सिद्धासिद्धिं मम दिसन्तु।

संस्कृतम् :— ओंकारं बिन्दुसंयुक्तं नित्यं ध्यायन्ति योगिनः। कामदं मोक्षदं चैवओंकाराय नमोनमः।

बंगाली :— रिसहादिणं चिणगं गोवदि गय-तुरगवाणराकोकं पवुमं नन्दावत्तम्।

शूरसेनी—

भवोहिंरिं विज्ञाणन्तो अण्णोण्णुप्पण्ण वेभमूढ्ण

लाड—

सित्थणवोद मायाचिरुव अस यण्यचरजिते

तेलगू—

सकलभूवलयमुनकु प्रभूग प्रभुवण्डु मनमुद णाणावरण क्षयकारणमनि नेनु नमस्कारंबु चोसि

तमिळु—

अधरमुदल् एलुत्तलां आदिभगवन् उलुक्कु मुदल् कुरुळ् काव्यात्तिल्

[शेरं ६ पुटं

— ५ पुटतः अनुवृत्तम्

एवं संस्कृत, प्राकृत, द्राविड, आंध्र, महाराष्ट्र, मळेयाळ, गुर्जर, अङ्ग, कालिङ्ग, काश्मीर, काम्भोज, हम्मीरी, शूरसेनी, वाली, तेवती, यवन, उपरिक, वराटिक, पैशाचिक, गान्धर्व, माहेश्वरी, दाम प्रभृतीनां ७१८ भाषाणां नामानि कथयित्वा इमाः सर्वा अपि भाषाः कर्नाटकभाषायामेव अनुस्यूताः कृत्वा अत्यद्भुतम् एकम् अपूर्वम् विश्वकोशमेव रचयिष्यामि इति सः ग्रन्थकारः प्रतिजानीते । तस्य प्रतिज्ञानुसारमेव अत्र ग्रन्थमध्ये सर्वानु अपि आसु नैकशताधिकासु भाषासु वेदान्त–वैद्यक–रसायन–गणित–ज्योतिष–अणुविज्ञान–लोहविज्ञान–जीवविज्ञानादिसर्वार्वाचीनविविधवैज्ञानिकविषया अपि सम्यक् सुसूक्ष्मरीत्या संचर्चिताः कूलंकषं च समालोचिताः दृश्यन्ते ।

शास्त्री.यदृच्छ्या । एतादृशमहाग्रन्थनिर्माणाय कियती वा कीदृशी वा विराड्रूपिणी प्रतिभा सर्वङ्कषा शेमुषी विश्वतोमुखं च पाण्डित्यमाश्चर्यकरम् आसीत् प्राचीनभारतीयानाम् इति विचारयन्तु वाचका एव ।

नैकसहस्रवर्षेभ्यः प्रागेव ईदृशमहाविश्वकोशरचनायां पटीयांसः भारतीयाः विद्वांसः कियन्तो वा ईदृशाः कालगर्भे विलीनाः? कियान्ति वा तेषां महान्ति सन्ति लसन्ति परिस्फुरन्ति च ग्रन्थरत्नानि क्रिमिकुलकवलीकृतानि कीटकृटकुक्षिभराणि वा भूत्वा नष्टानि नश्यन्ति वा न जानीमो वयम् । नूनमेतद्ग्रन्थस्य संपूर्णसंशोधनाय सर्वकारेणैव काचन पण्डितसमितिः नियोजनीया । अचिरादेव च संशोधितः परिचितः परिष्कृतः परामृष्टश्चायं समग्रोऽपि ग्रन्थः सर्वकारीयधनेनैव मुद्रणीयः प्रकाशनीयश्च । तेन च प्राचीनभारतीयानां ज्ञान-विज्ञान, साहित्य, शास्त्र, इतिहास, संस्कृति, सभ्यता, बुद्धिमत्तादि विषयेषु नवीना एव अंशा ज्ञायेरन् । भारतीयाः विद्वांसोऽपि इतः सविशेषमेव अवधानं प्रदाय एतद्ग्रन्थसागरस्य संपूर्णसंशोधनकार्यम् अङ्गीकुर्वन्तु इति सविनयं प्रार्थयामः ।

अस्य ग्रन्थस्य प्राप्तिस्थानमधुना–

संपादकाः श्री सर्वमङ्गलं श्री कण्ठय्या

प्रकाशकाः सर्वार्थसिद्धिसंघ ३५९ विश्वेश्वरपुरं बेंगळूर

प्रथमसंपुट मूल्यम् ५ रु.

मूर्खः कः ?

पण्डित जवाहरलालस्य भाष्यम्

पञ्चैतानि मूर्खलक्षणानि

१) सर्वकारीये शासनक्रमे व्यत्ययम् आतङ्कं च उपस्थापयितुं न्यायालय, पत्रालयादी (कोर्ट कचेरी पोस्ट-आफीस) नां दहनं, वाहननिरोधः, बाष्पयानस्य लोहमार्गोद्घाटनं च ।

१) आत्मनः उद्देशं आकाङ्क्षां च परिपूरयितुं अपशक्नुवाने अनिच्छति वा सर्वकारे अन्नसत्याग्रहस्य उपक्रमः

३) समाजस्य प्रगतेः प्रतिबन्धकारिणां पुरातनानां जीर्णशीर्ण संप्रदायानाम् अनूचानम् अनुसरणम् अक्षरशः तदाचरणं च ।

४) पुरः पुरः प्रधावति अपि जगति भूतकाल एव दृष्टिक्षेपः

५) देशे प्रत्येकोऽपि नागरिकः यावद् उद्योगम् नैव लभते तावद् रामराज्यं स्थापिनम् इति ग्रहणं च

संपत्सरस्वती सत्यं संतानं सदनुग्रहः ।
सत्तासुकृतसंभाराः सकाराः सप्त दुर्लभाः ॥१॥
मनो मधुकरो मेघो मानिनी मदनो मरुत् ।
मा मदो मर्कटो मत्स्यः मकाराः दश चंचलाः ॥२॥
विद्यया वपुषु वाण्या वाससा विभवेन च ।
वकारैःपञ्चाभिर्हीनो नरो नायाति गौरवं ॥३॥

भद्रा कुण्डलकेशा

जातक कथा

ले— कुमारी वासन्ती देशपाण्डे

पुरा भद्रा कुण्डलकेशा नाम काचन कन्या आसीत्। तस्याः पिता राजकुले रक्षापुरुषाधिकारी आसीत्। एकदा कश्चित् चोरः वधस्तंभ प्रतिमार्गेण नीयमानःआसीत्। सः गौरवर्णः सुन्दराङ्गः मनोहरः कारश्च आसीत्। तस्य काममुन्दरं शरीरं दृष्ट्वा कुण्डलकेशा मुग्धा बभूव। तस्याः मनः तस्मिन् चोरे अतीव आसक्तम् अभवत्। सः चोरः कुण्डलकेश्यामनश्चोरोऽपि अभवत्। तस्याः मनश्चञ्चलतां चोरे अनुरागं च ज्ञात्वा तस्याः पिता तन्मारणार्थं नि। युक्तेभ्यः रक्षिभ्यः उत्कोचं दत्वा तं मोचयामास। चोरेण सह एव स्वपुत्र्याः विवाहं एकान्ते अकरोत्। प्रभूतं च मुक्ता-रत्न-माणिक्य-वज्र-वैडूर्य-धन-कनकादि ऐश्वर्यं च सुतायै प्रायच्छत्।

तस्य च चोरस्य भार्यायाः अपेक्षा न आसीत्। तस्य च अपेक्षितं वस्तु नाम धनम् एव। चोरः सर्वदा चोरः एव। सः भार्यायाः प्रभूतां संपदं दृष्ट्वा सन्तुष्टः एव अभवत्। सर्वम् अपि तद्धनं चोरयितुम् उपायम् अचिन्तयत्।

एकस्मिन् दिने मधुरवचनैः तां तस्याः पितृ च सान्त्वयित्वा स्वग्रामं गन्तुं संमतिम् अलभत एकस्मिंश्च शुभमुहूर्ते तस्याः पिता सर्वैश्वर्येण सह तौ प्रस्थापयामास। अयं च धूर्तः चोरः तां सुदूरं एकं स्थानं निनाय। तत्र न कोऽपि नरः आसीत्। निर्मानुषं तं प्रदेशं दृष्ट्वा तस्य च आकारेण लक्षणैः वचनैश्च सा तस्य मनोगतं सम्यक् अजानात्। तदा च चतुरमतिः सा कुण्डलकेशी 'चोरमनुरक्ता अहमेव मूर्खा मन्दभाग्या च' इति मनसि उक्त्वा तं चोरं नाशयितुं उपायम् अचिन्तयत्। कूपोपकण्ठे स्थित्वा तं मन्दहासेन आलिङ्गनसौख्यमनुभोक्तुम् आह्वयत्। यदा च कामातुरः चोरः आगत्य तां दृढम् आलिङ्गत् तदा कुण्डलकेशी तं बलात् कूपे अपातयत्। स्वस्य च सर्वं ऐश्वर्यं गृहीत्वा पलायिता।

ततः पितुः गृहं प्रति गन्तुं तस्याः मनः अलज्जत। तदा सा तक्षशिलां प्रति विद्याध्ययनार्थम् आगता। तत्र च द्वादशवर्षान् यावत् स्थित्वा न्याय वेदान्त, साहित्य, सङ्गीत, व्याकरणादि शास्त्राणि सम्यग् अधीतवती। महापण्डिता च बभूव।

ततः चतुःशास्त्रचतुरा सा दिग्विजयार्थं प्रस्थिता। प्रतिग्रामं पण्डितान् पराजित्य जयपत्राणि संपादितवती। अपरिमितं च ऐश्वर्यम् अपि संपादितवती। अन्ते च सा सावत्ती नगरं प्रति आगता। तत्र च भगवतः बुद्धस्य साक्षात् शिष्येण सारिपुत्तेन सह तस्याः वाद विवादः अभवत्। बहूनां दिनानाम् अन्ते वाक्यार्थे सा पराजिता अभवत् सारिपुत्तेण। तदा सा तस्य शिष्या अभवत्। भगवतः श्रीगौतमबुद्धस्य समीपे सा आत्मनः सर्वं वृत्तान्तं निवेद्य स्वस्य च सर्वम् अपि ऐश्वर्यं तस्या आर्पयत्। तदा तस्याः वैराग्येण पाण्डित्येन पश्चात्तापेन लोकशिश्रूषया भक्त्या च परमप्रीतः बुद्ध भगवान् ताम् अनुगृह्य बौद्धधर्मदीक्षाम् अयच्छत्। "सङ्घं शरणं गच्छ" इति आदिश्नतां सङ्घान्तर्गताम् अकरोत्। ततः सा बौद्धभिक्षुकी कुण्डलकेशी पाण्डित्येन वक्तृत्वेन च देशविदेशेषु बौद्धधर्मस्य महान्तं प्रसारं प्रचारम् च अकरोत्।

Scanned by CamScanner

* मर्कटः पदवीधरः *

एकः पदवीधरः कुत्रापि नियोजनं न लभमानः बहुकष्टानि असहत। एकदा गच्छन् पथि सः नियोजनविषये एकं फलकं अपश्यत्। तत् तु प्राणिसंग्रहालयस्य द्वारे आसीत्। सः तु आत्मनः विज्ञापनापत्रेण सह वरिष्ठाधिकारिणम् अपश्यत्। प्रस्तावनानन्तरं तस्मै पदवीधराय प्रतिमासं रुप्यकाणां शतत्रय-वेतनदानं वरिष्ठेन निर्णीतम्। सः तु हर्षसंकुलःआत्मनः कर्तव्यं न अपृच्छत् गृहं च अगच्छत्। अन्यस्मिन् अहनि सः आत्मनः तत्र कार्यं श्रुत्वा दुःखितः अभवत्। यतः तस्य कर्तव्यं तु केवलम् मर्कटचर्मणा आत्मानम् आच्छाद्य मर्कटस्य इव तत्प्राणिसंग्रहालये इतस्ततः भ्रमणं प्लवनं च। किंतु अन्योपायम् अदृष्ट्वा सः तदेव कर्तव्यं स्व्यकरोत्। तस्मिन् प्राणिसंग्रहालये एकः मर्कटः मृतः आसीत्। अन्यस्य मर्कटस्य आनयनकालपर्यंतं ईदृशः उपायः तेन अधिकारिणा योजितः।

एकदा तु कस्यचन विद्यालयस्य छात्राः प्राणिसंग्रहालयम् द्रष्टुं तत्रागच्छन्। तेषां आगमनकाले सः पदवीधरः मर्कटचर्मणा आच्छादितः इतस्ततः प्लवमानः दन्तांश्च दर्शयन् च बभ्राम। परं किंचिदपि साहसकार्यं छात्रेभ्यः दर्शितव्यम् इति मत्वा सः एक स्तंभबद्ध रज्जोः उपरि स्थित्वा चलितुं प्रायतत। किन्तु अनभ्यासात् सः मर्कटवेषी पदवीधरः भूमौ सिंहस्य पंजरे अपतत्। सिंहः अपि क्षुत्क्षामकण्ठः तं मर्कटम् बुभुक्षुरिव गर्जनां कुर्वन् तस्य समीपं गतः। मर्कटः अपि भयभीतः किंकर्तव्यमूढः भूत्वा नेत्रे निमील्य देवं सस्मार। सिंहः अपि गर्जनां कुर्वन् मर्कटम् हन्तुं अगच्छत्। सर्वैः छात्रैः भीतैः आक्रुश्य आत्मनः नेत्राणि न्यमील्यन्त।

सिंहः मर्कटस्य कर्णं समीपं गत्वा एवं जगाद "भोःपदवीधर माबिभेहि। अहमपि त्वामिव सिंहवेषधारी

पुणे विश्वविद्यालयस्य अभिनन्दनीय उपक्रमः

सर्वत्रापि पुरोगामिनः मार्गदर्शिनश्च महाराष्ट्रियाः। संस्कृतस्य महत्वं योग्यतां च सम्यग् जानन्तः पुणेविश्वविद्यालयस्य अधिकारिणः "इतःपरं विश्वविद्यालयस्य पदवीदानसमारम्भेषु सर्वोऽपि व्यवहारः गीर्वाणभाषया एव निर्वर्तनीय, उत्सवारम्भे च सरस्वत्याः सूर्यस्य च प्रार्थनापराणि संस्कृतमङ्गलपद्यानि अवश्यं पठनीयानीति" आदर्श निर्णयम् अङ्गीकृतवन्तः इति श्रुत्वा सन्तुष्टाः वयम्। नूनं स्वतन्त्र भारते अद्यापि दीक्षान्तसमारोहभाषणानि आंग्लभाषयैव क्रियंत इति सत्यं लांच्छनास्पदमेव एतत्। ईदृशेषु मङ्गलमयेषु महोत्सवेषु देव भाषयैव "वेदमनूच्याचार्योऽन्ते वासिनमनुशास्ति। सत्यं वद। धर्मं चर। स्वाध्यायान्मा प्रमदः' इत्याद्युपनिषदानुपूर्वीसमुच्चारणपूर्वकमेव अतिथिभिःअध्यक्षैःकुलोपकुलगुरुभिश्च भाषणानि कार्याणि। तेनैव हि तेषां दीक्षान्तसमारम्भाणां परमं माङ्गल्यं शुभोदर्कता शोभा च संपद्येत। अस्मिन् विषये अग्रेसरत्वम् वहतः पुण्यपत्तनस्य अस्य आदर्शविद्यापीठस्य व्यवस्थापकान् सानन्दम् अभिनन्दामः। इतरानपि विश्वविद्यालयाधिकारिणः एतदादर्शम् अनुसर्तुं साञ्जलिबन्धं प्रार्थयामः

तथा संस्कृत प्राणान् विद्यापीठस्य उपकुलगुरून्

श्री मुकुन्दराव जयकर महोदयांश्च

सानन्दम् अभिनन्दामः।

पदवीधरः एव। कुत्रापि नियोजनं अलब्ध्वा अत्र आगतः" इति।

इदानीं ईदृशी पदवीधराणां शोचनीया दशा।

कालाय तस्मै नमः

लेखकः- वामन अनंत देशपांडे, शिक्षकः
इण्टर. एस्. टी. सि. रा. भा. कोविद. बेळगांव

Edited & Printed By- P K. Galagali at Chandrika Printing Works & Published by him at
VaijayantiKaryalaya Yogamandir **Bagalkot**, Dist:- Bijapur.

Scanned by CamScanner